# READER - III
## (SAMSKRITA TRITEEYADARSA)

॥ विद्यया विन्दते अमृतम् ॥



# Sanskrit Study Made Easy Series

**A Reformed Series of Four Illustrated Sanskrit Readers.**
With Grammatical Conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign **Countries**
Viz : Ceylon, Siam, Bangkok, Germany, Italy, **Australia**,
California, San Francisco etc.

AND SELECTED BY THE EMBASSY OF INDIA

*and The Ministry of Education and Scientific Research of Govt. of India for Presentation to Foreign Students of Sanskrit.*

# अनुक्रमणिका—CONTENTS


| पाठः | | | पृष्ठम् |
|---|---|---|---|
| | भारतदेशीयगीतम् | | ii |
| | Do. English Translation | | iii |
| १. | सरस्वती प्रार्थना | (पद्यपाठः) | १ |
| २. | सगरमहाराजः | | ६ |
| ३. | राजर्षिः भगीरथः | | ११ |
| ४. | हरिणाः | | १६ |
| ५. | बिडालः क्रोष्टा च | (पद्यपाठः) | १९ |
| ६. | श्रीकण्ठः शितिकण्ठश्च | | २२ |
| ७. | काष्ठविक्रेता कुठारश्च | | २७ |
| ८. | अपरिचित सौहार्दे दोषः | | ३० |
| ९. | महाकवि कालिदासस्य सूक्तयः | (पद्यपाठः) | ३५ |
| १०. | पत्रिकालेखनम् | | ३८ |
| ११. | अयः | | ४३ |
| १२. | मैत्री | (पद्यपाठः) | ४६ |
| १३. | गुरुभक्तिमहिमा | | ४९ |
| १४. | कालिदासस्य गुरुः—प्रथमो भागः | | ५४ |
| १५. | ,, —द्वितीयो भागः | | ५९ |

॥ श्रीरामजयम् ॥

॥ विद्यया विन्दते अमृतम् ॥

# ॥ संस्कृततृतीयादर्शः ॥



## १. सरस्वती प्रार्थना

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥ १

सुरासुरासेवितपादपङ्कजा करे विराजत्कमनीयपुस्तका ।
विरिञ्चिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे सदा ॥

माणिक्यवीणामुपलालयन्तीं
मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमलाङ्गीं
मातङ्गकन्यां मनसा स्मरामि ॥ ३

श्रीमच्चन्दनचर्चितोज्ज्वलवपुः शुक्लाम्बरा मल्लिका-
मालालालितकुन्तला प्रविलसन्मुक्तावलीशोभिता ।
सर्वज्ञाननिधानपुस्तकधरा रुद्राक्षमालाङ्किता
वाग्देवी वदनाम्बुजे वसतु मे त्रैलोक्यमाता शुभा ॥ ४

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा पूजिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥ ५

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ ६

---

१) प्रश्नाः—१. सरस्वत्याः वदनं पादपङ्कजं च कीदृशे ?
२. सरस्वत्याः स्वरूपं महिमानं च स्ववाक्यैः संक्षिप्य वर्णयत. ३. सा चतुर्भिर्दोर्भिः कानि वस्तूनि धरति ?

२) प्रयोगं विपरिणमयत—

१. विरिञ्चिपत्नी सरस्वती सदा मे वाचि नृत्यतु ।

२. त्रैलोक्यमाता वाग्देवी मम वदनाम्बुजे वसतु ।

३. निःशेषजाड्यापहा भगवती सरस्वती मां पातु ।

३) निर्दिष्टानां धातूनां शत्रन्तैः शानजन्तैर्वा (Present Participles) रूपैः वाक्यानि पूरयत—

१. सरस्वती माणिक्यवीणां (वाद्) ..गायति ।

२. वाग्देवता मे निःशेषं जाड्यं (अपहन्)....वाचि नृत्यतु ।

३. अनुपमया भासा (भास्)....सरस्वती मे जिह्वायां वसतु॥

४) तत्पुरुषसमासः—

| विग्रहवाक्यम् | | समासः |
|---|---|---|
| १. मदेन अलसा | = | मदालसा । |
| २. विरिञ्चेः पत्नी | = | विरिञ्चिपत्नी । |
| ३. वाचः देवता | = | वाग्देवता ॥ |

५) कृत् प्रत्ययान्ताः (Verbal Derivatives)—

स्मृ to remember = (स्मरति) स्मृतः, स्मृतवान्, स्मरन्, स्मर्यमाणः, स्मृत्वा, विस्मृत्य, स्मर्तुम्, स्मरणीयम्, स्मर्तव्यम् ॥

६) पर्यायाः—

सरस्वती ७—ब्राह्मी गीर्भारती वाणी शारदा वाक् सरस्वती ।

वचः ६—व्याहार उक्तिर्लपितं भाषितं वचनं वचः ।

वीणा ३—विपञ्ची वल्लकी वीणा ॥

---

शारदा *f* the goddess of learning

शारद *a* autumnal

अम्भोज, अम्बुज *n* a lotus

सर्वदा *in.* always

सर्वंदा *a. f.* bestower of all desired objects
सन्निधि *m.* a great treasure
सन्निधि *m.* presence
आसेवित *p p p.* attended on all sides
पादपङ्कज *n* the lotus-feet
विरिञ्चि } *m* ब्रह्मन्
विरिञ्च }
माणिक्यवीणा *f.* a ruby- [lute
उपलालयन्ती *pr. a. p.* playing on
मञ्जुल *a.* agreeable
माहेन्द्रनील *n* an emerald
द्युति *f.* lustre
चन्दनचर्चित *a.* besmeared with sandal paste
कुन्तल *m.* hair of head
तुषार *m.* snow
जाड्यापहा *a. f.* she who wards off dullness
सित *a.* white
भासमाना *a. f.* shining
असमाना *a. f.* matchless.

---

## ABBREVIATIONS USED

*N.* Noun विशेष्यम्
*a.* Adjective विशेषणम् (can be used in 3 genders)
*m.* Masculine पुलिङ्गम्
*f.* Feminine स्त्रीलिङ्गम्
*n.* Neuter नपुंसकलिङ्गम्
*P.* Parasmaipadi परस्मैपदी
*A.* Atmanepadi आत्मनेपदी
*U.* Ubhayapadi उभयपदी
*in* Indeclinable अव्ययम्
*ppp.* Past Passive Participle क्तप्रत्ययान्तः
*p. a p.* Past Active-Participle क्तवतुप्रत्ययान्तः
*pr. a. p.* Present Active Participle शतृप्रत्ययान्तः or शानच् प्रत्ययान्तः
*pr. p. p.* Present Passive Potential कर्मणि शानच् प्रत्ययान्तः
*pt. p.* Potential Participle कृत्यप्रत्ययान्तः

## कृदन्ताः- Verbal Derivatives-(Ex: Root - कृ to do)

| Name of Participle | Root with affix | Derivative | Meaning |
|---|---|---|---|
| 1. Past Passive | (कृ + त) | कृतः | has been done |
| 2. Past Active | (कृ + तवत्) | कृतवान् | has done |
| 3. Present Active | (कृ + अत्) | कुर्वन् | Is doing |
| 4. Present Passive | (कृ + यमानः) | क्रियमाणः | Is being done |
| 5. Indeclinable Past (without Preposition) | (कृ + त्वा) | कृत्वा | having done |
| 6. Do (with Preposition) | (उप + कृ+य) | उपकृत्य | having helped |
| 7. Infenitive of Purpose | (कृ + तुं) | कर्तुं | to do |
| 8. Potential | कृ + तव्य ; अनीय or य | कर्तव्यम् करणीयम् or कार्यम् | has to do |

**Note:—1 to 4 and 8 are declinables and can be used in all 3 Genders.**

# २. सगरमहाराजः

अयोध्याधिपतिः शूरः पूर्वमासीन्नराधिपः ।
सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजाः ॥
—श्रीमद्वाल्मीकिरामायणे बालकाण्डे सर्गः ३८—२

आसीदयोध्यायां सूर्यवंशीयः धर्मात्मा शूरः सगरो नाम महाराजः, यः खलु सागराम्बरां विश्वम्भरां प्रीत्या शासत् प्रजानामनुरागस्य पात्रतामगमत् । तस्य केशिनी सुमतिश्चेति द्वे भार्ये अभूताम् । तयोः केशिन्यामसमञ्जाख्य एकः पुत्रः समजनि । सुमतिस्त्वेकं गर्भपिण्डमसोष्ट । विदारिते च तस्मिन् पिण्डे षष्टिसहस्राणि पुत्रास्ततो विनिस्सृताः । ते सर्वे शस्त्रविद्यायामश्वारोहणे त्रय्यामान्वीक्षिक्यां वार्तायां दण्डनीतौ च परं प्रावीण्यमुपगताः । कालेन रूपयौवनशालिनः समवर्धन्त ॥

तत्र यः केशिन्यास्तनयोऽसमञ्जः स दुर्मतिर्दुराचारः प्रजानामहितश्च यन्नमसञ्जस एवासीत् । अतः स पित्रा राज्यान्निष्कासितः । अंशुमान् नाम तस्यात्मजस्तु साधुवृत्तः सुधांशुरिव प्रमोदं जनयन् जनतायाः प्रीतिपात्रमभूत् ॥

धीरैः शूरैश्च बहुसङ्ख्यैः पुत्रैः परिवृतः स राजा परमानन्दमविन्दत । एकदा स महाराजो महता विभवेन शतं यज्ञान् कर्तुमुपाक्रमत । निर्वर्तितास्तेन निर्विघ्नमेकोनशतं यागाः । आरब्धे च शततमे मखे 'सगरोऽयं शतमखो भूत्वा स्वकीयं

पदमपहरिष्यति' इति भिया वासवः सद्य एव रक्षोरूपेणागत्य यज्ञियमश्वं हठादाकृष्य रसातलमनैषीत् ॥

तेन पर्याकुलः सगरस्तदन्वेषणाय षष्टिसहस्राणि पुत्राना-दिक्षत् । ते च भुवं परिभ्रम्य तुरगमलभमानाः पातालं प्रवि-विक्षवः क्षितिमखानिषुः । सगरतनयैः खातानि गर्तान्येव सम्प्रति सागरत्वेन प्रथन्ते ॥

तेनैव मार्गेण सगरपुत्राः पातालं प्रविश्य तत्र घोरे तपसि वर्तमानस्य महर्षेः कपिलस्यान्तिके चरन्तं स्वीयं यज्ञाश्वमद्राक्षुः। दृष्ट्वा चायमेवास्माकमश्वस्य हर्तेति भाषमाणास्ते खनित्राणि लाङ्गलानि च दधतस्तमभ्यधावन् । तदवलोक्य क्रुद्धो महर्षि-स्तान् शापाग्निना भस्मसादकार्षीत् ॥

ततः स्वतनयांश्चिरमनागतान् वीक्ष्य विषण्णो नरपति-स्तेषामन्वेषणाय नप्तारमंशुमन्तं प्राहिणोत् । स च भुवं परि-भ्रम्य पातालं प्रविष्टः पथि गच्छन् यदृच्छया सगरतनयानां मातुलं खगेन्द्रमद्राक्षीत् । अप्राक्षीच्च तं तेषां वृत्तान्तम् । कपिलेन भस्मीकृतान् सगरसुतान् यज्ञियमश्वं च खगेन्द्रस्तस्मै दर्शयामास ॥

तदवलोक्य शोकाकुलं पितृव्याणां तर्पणाय सलिलमन्वेष्टुं प्रवृत्तमंशुमन्तं सुपर्णोऽभ्यधात्–'वत्स ! कपिलरूपेणावतीर्णस्य भगवत एवायं व्यापारः । नात्र शोकः कार्यः । अपि चैतेषां

लौकिकेनाम्भसा तर्पणं न युक्तम् । या खलु हिमवतो ज्येष्ठा पुत्री गङ्गा नाम तस्याः क्षितिमानीतायाः सलिलेन तर्पणीया एते महात्मानः । अतस्तुरङ्गममानीय निवर्तस्व ' इति ॥

तन्निशम्यांशुमांस्तुरगमानीय सगरायार्पयित्वा पितृव्याणां वृत्तान्तं खगेश्वरस्य वचनं च तस्मै व्यजिज्ञपत् । सगरश्च तच्छ्रुत्वा शोकापन्नोऽप्यारब्धं यज्ञं परिसमाप्य गङ्गाया आनयने परं यत्नमाधात् । परं तु स भग्नोद्यमः परितप्यमानः कालेन दिवमरुक्षत् ।

तदनु तद्वंशीयाः परमसाहसिका दिलीपादयो राजानः सुरधुनीं भुवमवतारयितुं यावज्जीवं प्रायतिषत । तेऽपि विफलोद्यमा अभूवन् ॥

---

१) प्रश्नाः—१. सगरात्मजानामुत्पत्तिं वर्णयत । २. कस्य यज्ञियमश्वं कः किं निमित्तं रसातलमनैषीत्? ३. सगरात्मजास्तदन्वेषणाय किमकुर्वन्? ४. कः कस्य हेतोस्तान् भस्मसादकार्षीत्? ५. अंशुमान् कः? ६. तेन कथं यज्ञियोऽश्वः प्रत्यानीतः? ७. गङ्गायाः आनयनार्थं के यत्नमादधुः? ८. तेषां यत्नः कीदृशोऽभूत्?

२) असोढ, अजनि, अनैषीत्, अदिक्षत्, अद्राक्षुः अप्राक्षीत्, अभ्यधात्, आरुक्षत्-एषां लटि लङि च रूपाणि निर्दिशत ॥

३) शत्रन्तैः रूपैः वाक्यानि पूरयत—

१. गुरवः शिष्यान् धर्मम् (अनुशास्)....सन्मार्गं नयन्ति ।

२. बालिकाः पुस्तकानि (धा)···पाठालयं व्रजन्ति ।

३. राजानः पुरा धरां (भृ)...प्रजा आनन्दयामासुः ।

४. बालाः श्वभ्यो (भी)...सुदूरं पलायन्ते ।

५. पक्षिणस्तण्डुलकणान् (दा)...स्वशावकान् पोषयन्ति ॥

४) तत्पुरुषसमासः—

| विग्रहवाक्यम् | | समासः |
|---|---|---|
| १. शोकम् आपन्नः | = | शोकापन्नः । |
| २. शोकेन आकुलः | = | शोकाकुलः । |
| ३. सगरस्य पुत्राः | = | सगरपुत्राः । |
| ४. नगरे वासः | = | नगरवासः ॥ |

५) पर्यायाः —

गरुडः १—गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥

३) कृत्प्रत्ययान्ताः —

१. शास् to command=(शास्ति) शिष्टः, शिष्टवान्, शासत्, शिष्यमाणः, शिष्ट्वा, शासित्वा, आशास्य, शासितुम्, शासनीयम्, शासितव्यम्, शिष्यम् ।

२. खन् to dig=(खनति) खातः, खातवान्, खनन्, खन्यमानः, खात्वा, खनित्वा, निखाय, खनितुम्, खननीयम्, खनितव्यम्, खेयम् ।

३. दिश् to grant=(दिशति) दिष्टः, दिष्टवान्, दिशन्, दिश्यमानः, दिष्ट्वा, आदिश्य, देष्टुम्, देशनीयम्, देष्टव्यम्, देश्यम् ॥

---

विश्वम्भरा *f* the earth
विदारित *ppp.* split open
शस्त्रविद्या *f* Science of arms
अश्वारोहण *n* horse-riding
त्रयी *f* the three Vedas —ऋक्, यजुस्, सामन्
अन्वीक्षिकी *f* तर्कशास्त्र Metaphysics
वार्ता *f.* business, trade
दण्डनीति *f* administration of justice
प्रावीण्य *n* proficiency
असमञ्जस *a* unfit
निष्कासित *ppp.* expelled
साधुवृत्त *a* well conducted and also of round shape
पर्याकुल *a* perturbed
प्रविविक्षु *a* desirous of entering
खात *ppp.* dug
गर्त *n* a pit
खनित्र *n* a spade
लाङ्गल *n* a plough
खगेन्द्र *m* गरुड

---



# ३. राजर्षिः भगीरथः

भगीरथस्तु राजर्षिः धार्मिको रघुनन्दन ।
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ॥

—श्रीमद्वाल्मीकिरामायणे बालकाण्डे सर्गः ४२—११

अथ गच्छति काले तस्मिन्नेव सूर्यवंशे भगीरथो नाम राजर्षिः जज्ञे । स च स्ववंशीयानां सगरात्मजानां वृत्तान्तेन नितान्तं सन्तप्तो राज्यधुरां सचिवेषु निक्षिप्य स्वयं गङ्गानयनाय चिरमूर्ध्वबाहुर्मासाहारश्च भूत्वा घोरं तपोऽतप्यत ॥

वर्षसहस्रान्ते च प्रीतो भगवान् पद्मयोनिस्तस्य पुरस्तादाविर्भूय—'राजन्! इक्ष्वाकुकुलभूषामणे! साहसिन्! प्रीतोऽस्मि। वरं वृणीष्व'—इत्यवोचत्। भगीरथश्च प्राञ्जलिर्भगवन्तमुपस्थाय—'भोः! करुणानिधे! परमेष्ठिन्! चिरात् खलु भस्मीभूता मे प्रपितामहा निरुदकाः क्लिश्यन्ते। तेषां च तर्पणाय यथा भगवतीं व्योमगङ्गां भुवमानेतुं प्रभवेयं तथा मामनुगृहाण'—इति प्रार्थयत॥

तच्छ्रुत्वा प्रीतः पद्मयोनिः—राजन्! फलिष्यति ते मनोरथः। किन्तु सुदुस्सहेन वेगेनावतरन्ती सा भुवं प्लावयिष्यति। तस्याश्च धारणाय न कश्चित् पशुपतेरन्यः क्षमते। तस्मात् तं शरणं व्रज'—इत्यावेद्यान्तर्हितः॥

ततो भगीरथः पशुपतेस्तोषणार्थं निराहारो भूत्वा अङ्गुष्ठाग्रेण तिष्ठन् तीव्रं तपस्तेपे। संवत्सरान्ते च तस्य तपसा प्रीतः शङ्करः प्रादुर्भूय-'राजन्! अलं तपसा शिरसा धारयिष्यामि शैलराजसुतामहम्'—इत्युक्त्वा तिरोदधे॥

इत्थं लब्धवरो भगीरथः पुष्करसरितं स्तुतिभिरुपातिष्ठत। तत्क्षणमेव मुखरयन्ती दिगन्तानि महती सरिदाकाशात् पशुपतेः शिरसि पपात। महावेगा सा तरसैव शिरसा गृहीत्वा परमेश्वरं रसातलं नेतुमुदयुङ्क्त। पशूनां पतिः कपर्दी क्रुद्धस्तां जटया बबन्ध। तथा बद्धा सा तत्रैव निश्चलाऽभूत्॥

ततः पश्चाद्भग्नमानसो भगीरथः पुनरपि तीव्रेण तपसा शङ्करमाराधयामास। तेन प्रीतो भगवान् जटाबद्धां गङ्गां शनैर्बिन्दुसरः प्रति विससर्ज। विसृष्टायास्तस्याः सप्तधा भिन्नायाः काचिदेका शाखा महारथं भगीरथमनुगच्छन्ती प्रोवाह। महता वेगेन प्रवहन्ती सा जह्नुमहर्षेःदीर्घसत्रमुपासीनस्य यज्ञवाटं प्लावयामास। स च कुपितस्तां चुलुकीचकार॥

अनन्तरं भगीरथो भग्नमनोरथोऽप्यारब्धस्य कर्मणः परित्यागमयुक्तमाकलयन् भूयोऽपि शान्तो दान्तश्च भूत्वा देवान् दध्यौ। तेन प्रीताः सुमनसो देवाः सद्यः समेत्य जह्नुमहर्षिमसान्त्वयन्। गङ्गां च जह्नुमहर्षेः पुत्रीस्थाने पर्यकल्पयन्। स तां श्रोत्राभ्यामुत्ससर्ज। अत एव गङ्गा ‘ जाह्नवी ’ इति व्यपदिश्यते॥

अथ गङ्गयाऽनुगतो भगीरथः पातालं प्रविश्य तत्र भस्मचयरूपेणावस्थितान् सगरात्मजान् गङ्गासलिलेन तर्पयित्वा दिवमारोपयत्। कृतार्थं चात्मानं मेने। तदनु गङ्गाऽपि ‘भागीरथी ’ इति प्रथामवाप॥

भर्तृहरिः पुरुषश्रेष्ठानां धैर्यशीलादीन् गुणान् नीतिशतके इत्थं वर्णयति—

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।
(वसन्ततिलकावृत्त श्लोकः)

---

१) प्रश्नाः—१. भगीरथः कः? २. स गङ्गां भुवमानेतुं किमकरोत्? ३. स पद्मयोनिं कं वरं प्रार्थयत? ४. पद्मयोनिः किम् आवेदयत्? ५. कथं पशुपतिस्तेन तोषितः? ६. स तं किमब्रवीत्? ७. गङ्गा कुत्र कुतः केन निरुद्धाऽभूत्? ८. गङ्गायाः जाह्नवी इति, भागिरथी इति व्यपदेशौ कथं सिद्धौ? ९. अस्मिन् पाठे उपदेशं वर्णयत ॥

२) तत्पुरुषसमासः—

| विग्रहवाक्यम् समासः | विग्रहवाक्यम् समासः |
|---|---|
| १. जटायां बद्धा=जटाबद्धा । | ३. भस्मनां चयः=भस्मचयः । |
| २. पशूनां पतिः=पशुपतिः । | ४. शैलानां राजा=शैलराजः । |

३) कर्मधारायसमासः—

| विग्रहवाक्यम् | | समासः |
|---|---|---|
| १. सुभ्रं च तत् वस्त्रं च | = | शुभ्रवस्त्रम् । |
| २. कृष्णश्चासौ सर्पश्च | = | कृष्णसर्पः । |
| ३. कृष्णा चासौ मृगी च | = | कृष्णमृगी । |
| ४. शाप एव अग्निः | = | शापाग्निः ॥ |

४) जाह्नवी, भागीरथी—अनयोः विग्रहवाक्यं वदत ॥

५) कृत्प्रत्ययान्ताः—

जन् (जा) to be born = (जायते) जातः, जातवान्, जायमानः, जनित्वा, संजन्य, जनितुम्, जननीयम्, जनितव्यम् ॥

६) पर्यायाः—

वंशः ९—सन्ततिर्गोत्रजनन कुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः सन्तानः ॥

मनोरथः ११—इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ।
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ॥

---

राज्यधुरा *f* the yoke of Government
ऊर्ध्वबाहु *a* raising the arms upwards
निरुदक *a* without libations of water
प्लावयिष्यति *P.* will wash [away
शैलराजसुता *f* गङ्गा
तिरोदधे *A.* disappeared
पुष्करसरित् *f* the celestial river
मुखरयन्ती *f* filling with noise
यज्ञवाट *m* यागशाला
महारथ *m* a great warrior
—It is thus defined:

एको दश सहस्राणि
योधयेद्यस्तु धन्विनाम् ।
शस्त्रशास्त्रप्रवीणश्च
विज्ञेयः स महारथः ॥

प्रोवाह *U.* flowed
चुलुकीचकार *U.* sipped
भस्मचय *m* a heap of ashes.

वृत्त—is a Stanza, the Metre of which is regulated by the number and position of Syllables in each पाद.



## ४. हरिणाः

हरिणाः केचिदश्वा इव प्रांशवः केचिदजा इव ह्रस्वाश्च। तेऽत्यन्तं भीरवः। तृणेऽपि चलति ते साध्वसेन सम्भ्रान्ताः पलायन्ते। हरिणाः प्रायेण शान्तेषु शाद्वलेषु च प्रदेशेषु निवसन्ति। ऋषय इमानाश्रमेष्वपत्यनिर्विशेषं पोषयन्ति॥

हरिणानां चरणाः कृशा असुन्दराश्च। अथापि ते शीघ्रतरं धावितुं शक्नुवन्ति। तेषां लोचने कर्णान्तविस्तृते।

हरिणीनां शृङ्गाणि न विद्यन्ते। हरिणानां शृङ्गाणि तु बहुशाखानि मनोहराणि च। इत्थं हरिणाश्चारुरूपा मृगाः। ते कदाचिदात्मसौन्दर्येण दृप्ता भवन्ति। तथा हि—

एणः कश्चित् कदाचिज्जलं पिबन्नात्मनः प्रतिबिम्बं जले ददर्श। दृष्ट्वा च मनस्यचिन्तयत्—'अहो! कियच्चारवो मे शृङ्गशाखाः! कियत् रुचिरे मे नयने! कियत् कोमलानि मेऽङ्गानि! यदि मे चरणा अपि पीवराः सुन्दराश्चाभविष्यंस्तर्हि न मां कोऽपि रूपेण जगत्यजेष्यत्। धिग्विधातारं यो मे चरणानसुन्दरान् व्यधित'—इति॥

इत्थं विचिन्तयति तस्मिन्नकस्मात् कस्याप्यतिमहतः शबरसैन्यस्य कोलाहलध्वनिरश्रूयत। श्रुत्वा च तं हरिणः सहसा पलायत। पलायमानं तं दृष्ट्वा द्वित्राः शबरा अन्वधावन्। द्रुतं धावन् हरिणः सुदूरमतिचक्राम। किन्त्वतिद्रुतं पलायमानस्य तस्य बहुशाखं शृङ्गं कस्यचित् तरोरधश्शाखायां लग्नमभूत्। स च तस्मादात्मानं मोचयितुं नाशकत्। पश्चाद्धावन्तः शबरास्तं शाखाबद्धमवलोक्य सामोदमुपजग्मुः॥

तान् दृष्ट्वा हरिणः सुतरामुद्विग्नो मनस्येवमचिन्तयत्—'अहो! बत! विधातुरविमृश्यकारिता यो मे शृङ्गं बहुशाखमस्राक्षीत्। हन्त! यन्मया सुन्दरत्वेन गृहीतं तदिदानीमसुन्दरं जातम्। यदि शृङ्गाणि नाभविष्यस्तर्ह्यसुन्दरा अपि

मे चरणाः सम्प्रति मामरक्षिष्यन् '—इति। इत्थमालोचयन्नेव स हरिणः शबरैर्गृहीतो व्यापादितश्च ॥

तस्मात् यत् कार्यकारि तदेव सौन्दर्यमस्माभिरभिलषणीयम्। कार्यविघातकं तु सौन्दर्यमस्माकं विनाशायैव भवति ॥

---

१) प्रश्नाः—१. हरिणाः कीदृशा मृगाः? २. केन ते दृष्टा भवन्ति? ३. जलं पिबन्नेणः स्वस्य प्रतिबिम्बं जले दृष्ट्वा किमचिन्तयत्? ४. तथा चिन्तयति तस्मिन् किं सम्भूतम्?
५. शबरान् दृष्ट्वा हरिणः किमचिन्तयत्?
६. ततः किं जातम्?

२) क्तप्रत्ययान्तैः पदैः वाक्यानि पूरयत—
१. भगवती वाग्देवता मयि (प्रसद्)...भवतु।
२. सगरेण यथाविधि शततमो यागः (समारभ्)...।
३. हनूमताऽशोकवने सर्वे पादपाः (भञ्ज्)...।
४. आकाशात् पतिता गङ्गा सप्तधा (भिद्)...प्रावहत्॥

३) नञ् बहुव्रीहिः—

| विग्रहवाक्यम् | समासः |
|---|---|
| १. न विद्यते तटं येषां ते = | अतटाः। |
| २. न विद्यते पुत्रः यस्य सः= | अपुत्रः। |
| ३. न विद्यते पापं यस्य सः= | अपापः॥ |

४) पर्यायाः—
हरिणः ५—मृगे कुरङ्गवातायु हरिणाजिनयोनयः।
सुन्दरं १२—सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्॥

---

हरिण, एण *m* a deer
साध्वस *n* fear
सम्भ्रान्त a perplexed
शाद्वल *a* grassy
दृप्त *a* puffed up, proud
शबर *m* hunter
लग्न *a* held fast
उद्विग्न *a* being trembled
अविमृश्यकारिता *N. f.* the state of doing things inconsiderately
व्यापादित *ppp.* was slain
कार्यकारिन् *a* efficacious

## ५. बिडालः क्रोष्टा च

कश्चिद्बिडालः क्रोष्टा च मैत्रीं कृत्वा परस्परम् ।
एकदा पर्वसमये सेतुस्नानाय जग्मतुः ॥ १

वनमार्गेण गच्छन्तौ घर्मतप्तकलेवरौ ।
क्वचिच्छायामुपाश्रित्य सुस्थौ सँल्लेपतुर्मिथः ॥ २

क्रोष्टा बिडालमब्रूत सखे! वनमिदं खलु ।
यदि व्याधः समागच्छेत् त्वयाऽत्मा रक्ष्यते कथम् ॥ ३

कांस्कानुपायाञ्जानीषे? का विद्याः शिक्षितास्त्वया?।
इति पृष्टो बिडालस्तं क्रोष्टारं प्रत्यवोचत ॥ ४

युक्तिरेका मयाऽधीता न त्वन्या ज्ञायते मया ।
वृक्षमारुह्य जीवेयं यदि व्याधः समापतेत् ॥ ५

तस्य तद्वचनं श्रुत्वा विहसञ्जम्बुकोऽवदत् ।
सखे! त्वामनुशोचामि तपस्वी त्वं विपत्स्यसे ॥ ६

मया पश्य विदग्धेन युक्तयः शिक्षिताः शतम् ।
येन केनाप्युपायेन रक्ष्येतात्मा मया द्रुतम् ॥ ७
छित्रानुपायानधुना शिक्षये त्वां यदीच्छसि ।
ज्ञातव्या बहवो विद्याः किञ्चिज्ज्ञत्वं भयावहम् ॥ ८
इति ब्रुवाणे गोमायौ स्नेहार्द्रं सरसं वचः ।
अकस्मादागतस्तत्र धनुरादाय लुब्धकः ॥ ९



तं विलोक्य स मार्जारो व्याधेनालक्षितो द्रुतम् ।
भूरुहाग्रं समारुह्य विटपान्तर्न्यलीयत ॥ १०
लुब्धको जम्बुकं दृष्ट्वा तस्यान्तिकमभिद्रुतः ।
इतिकर्तव्यतामूढः क्रोष्टा व्यामोहमव्रजत् ॥ ११

शते युक्तिषु का योज्या कतमा श्रेयसी भवेत् ।
किं नु धावामि किं युध्ये जङ्गम्ये किमुत्प्लुवे ॥ १२

किं शये मृतवद् भूमौ किं नु वृक्षं समाश्रये ।
इत्थं विकल्पयन् क्रोष्टा तस्थौ तत्रैव मोहितः ॥ १३

लुब्धको द्रुतमभ्येत्य धनुषाऽऽहत्य जम्बुकम् ।
गृहीत्वा हर्षभरितो न्यवर्तत गृहं प्रति ॥ १४

बालाः पश्यत बह्वीभिर्विद्याभिः किं प्रयोजनम् ।
सङ्गता कार्यकाले या सैव विद्या प्रकीर्तिता ॥ १५

---

१) प्रश्नाः—१. कौ कदा सेतुस्नानाय जग्मतुः ? २. कुत्र सुस्थौ तौ मिथः सँल्लेपतुः ? ३. क्रोष्टा बिडालं किमब्रूत ? ४. बिडालः क्रोष्टारं किं प्रत्यवोचत ? ५. तस्य तद्वचनं श्रुत्वा विहसन् जम्बुकः किमवदत् ? ६. कदा कस्तत्र समागतः ? ७. तं विलोक्य बिडालो जम्बुकश्च किमकुरुताम् ? ८. जम्बुकस्य विकल्पाः कीदृशाः? ९. अनया कथया किं गृह्यते युष्माभिः ?

२) प्रयोगं विपरिणमयत—

१. कश्चित् बिडालः क्रोष्टा च सेतुस्नानाय जग्मतुः ।
२. यदि व्याधः समागच्छेत् त्वया कथमात्मा रक्ष्येत ।
३. युक्तिरेका मयाऽधीता न त्वन्या ज्ञायते मया ॥

३) सहपूर्वपदो बहुव्रीहिः—

| | | | | | |
|---|---|---|---|---|---|
| १. रसेन | सह | वर्तत | इति | = | सरसम् । |
| २. आदरेण | सह | वर्तत | इति | = | सादरः । |
| ३. पुत्रेण | सह | वर्तत | इति | = | सपुत्रः । |
| ४. भार्यया | सह | वर्तत | इति | = | सभार्यः । |

४) पर्यायाः—

व्याधः ४—व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ॥

---

बिडालः *m* a cat
पर्वसमय *N. m* the day of new or full moon
कलेबर *n* body
सुस्थ *a* sitting happily
व्याध, लुब्धक *m* a hunter
तपस्विन् *m* helpless
विदग्ध *a* clever
भूरुहाग्र *n* top of a tree
विटपान्त. *in.* inside a bough
इतिकर्तव्यतामूढ *a* not knowing what to do
व्यामोह *m.* confusion
कतमा *a. f.* which of these
विकल्पयन् *pr. a. p.* allowing options

---

## ६. श्रीकण्ठः शितिकण्ठश्च

आस्तां कस्मिंश्चिदग्रहारे 'श्रीकण्ठः' इति 'शितिकण्ठः' इति च द्वौ सहाध्यायिनौ सखायौ। तयोः श्रीकण्ठो जन्मना धनिकः। शितिकण्ठस्त्वकिंचनः। श्रीकण्ठो रमणीयं सौधमधिवसति। प्रत्यहमश्वशकटेन पाठालयं गच्छति। शितिकण्ठस्तु उपनगरं पित्रा सहैकस्मिन् कुटीरे निवसति। तस्य माता बाल्य एव दिवं गता। स एक एव पुत्रः। अतो गृहकार्यमपि सर्वं तेनैव कर्तव्यमासीत्। अथापि स स्वकीयान् पाठान् पठन् यथाकालं विद्यालयं गत्वा सश्रद्धं विद्याम-भ्यास्यत् ॥

एकस्मिन्नहनि मध्याह्ने विश्रान्तिवेलायां श्रीकण्ठः शितिकण्ठश्च पाठालये किमपि संभाषमाणावास्ताम्। तत्प्रसङ्गाच्च श्रीकण्ठः शितिकण्ठमाह—'सखे! त्वमतीव दुर्गतोऽसि। भृशं त्वामनुशोचामि, किं न त्वं धनिको भवितुमिच्छसि? अहं तावत् सुखी वर्ते। मम गृहे द्वौ भृत्यौ स्तः। यद्यदाज्ञापयामि तत् सर्वं तौ कुरुतः। न किञ्चिदपि गृहे मे कर्तव्यमस्ति। त्वद्गृहे तु सर्वं कर्म त्वयैव क्रियते। नैकोऽपि भृत्यस्तवास्ति'—इति॥



शितिकण्ठः—सखे! इदं तावदज्ञानेनोदीरितं त्वया। ममापि सन्त्यष्टौ भृत्याः। ते मद्वचनमनुवर्तन्ते॥

श्रीकण्ठः—सौम्य! त्वं सत्यवादीति सर्वे त्वां स्तुवन्ति। तस्यैव हेतोरुपाध्यायोऽपि त्वयि नितरां स्निह्यति। कथं त्वमद्य मिथ्यावादी संवृत्तः?

शितिकण्ठः—सखे ! नैव मया मिथ्योक्तम् । सत्यं सन्त्येव ममाष्टौ भृत्याः ॥

श्रीकण्ठः—भद्र ! त्वमकिञ्चन इति सर्वो जानाति । एकमपि भृत्यं भृतिदानेन नियोक्तुं न शक्तस्त्वम् । कथङ्कारमष्टौ भृत्यान् नियोक्ष्यसे ? कथमिदं ते वचः श्रद्धातव्यम् ?

इदमनयोः संभाषणमुपाध्यायो भित्यन्तरितः शृण्वन्नासीत् । सोऽपि शितिकण्ठस्य वचनमसत्यं मन्यमानः सहसा सविधमागत्य कुपित इव शितिकण्ठमब्रवीत्—'अरे ! तवाष्टौ भृत्याः सन्तीत्यविश्वसनीयमिदं वचः । किमित्येवं मिथ्या भाषसे ? किं न जानासि विनोदार्थमप्यसत्यं न वक्तव्यमिति ?

शितिकण्ठः स्मयमानः प्राह—'प्रसीदत्वाचार्यः । नैव मिथ्या भाषितं मया । सत्यमेव सन्ति ममाष्टौ भृत्याः । श्रीकण्ठस्य भृत्याः कदाचित् कार्यान्तरेण यत्र कुत्रापि गच्छेयुः। कदाचिदालस्येन कर्मापि न कुर्युः । मम भृत्यास्तु न तादृशाः। सततं ते ममाज्ञामनुपालयन्ति । न च ते मां विहाय क्षणमप्यन्यतो गच्छन्ति । तेभ्यो मया काकिण्यपि न वेतनं दीयते ॥

उपाध्यायः—वत्स ! हृदयङ्गम उपन्यासः । ब्रूहि तावत् के ते तव भृत्याः ?

श्रीकण्ठः—साधु सखे ! तेषां नामानि ब्रूष्व ॥

शितिकण्ठः—आचार्य ! सत्यमुक्तं मया। मम सन्त्यष्टौ भृत्याः। ते च नामतः—मम द्वौ पादौ, द्वौ हस्तौ, द्वे नेत्रे, द्वे श्रोत्रे च। अष्टावेते भृत्याः सविनयं मदुक्तमनुतिष्ठन्ति। यदाऽहं कुत्रचिज्जिगमिषामि तदा मम पादावाज्ञापयामि—'तत्र मां नयतम्' इति। तौ च सत्वरमेव मां नयतः। एवं यदा किंचिद्वस्तु जिघृक्षे तदा मम हस्तौ, यदा किंचिद्दिदृक्षे तदा नेत्रे, यदा किमपि शुश्रूषे तदा श्रोत्रे चादिशामि। सत्वरमेतैस्तत्तत् कार्यं क्रियते। नापेक्ष्यते द्विस्त्रिरुक्तिः। यद्यत् श्रीकण्ठस्य भृत्याः कुर्वन्ति तत् सर्वमेते कर्तुं प्रभवन्ति॥

श्रुत्वेदं वचनमुपाध्यायश्चमत्कृतः परं प्रसन्नः प्रत्यवोचत्—'वत्स! साधूक्तं त्वया। ईदृशा एव भृत्याः प्रशस्यन्ते। यावदिमानेव भृत्यानादरिष्यसे तावत् त्वं श्रेयोऽवाप्स्यसि'—इति॥

---

१) प्रश्नाः—१. श्रीकण्ठः शितिकण्ठश्च कीदृशौ बालौ ? २. कस्तयोः जीविकायाः प्रकारः ? ३. तयोः कुत्र कीदृशं संभाषणं प्रवृत्तम् ? ४. कुपित उपाध्यायः शितिकण्ठं किमवोचत् ? ५. शितिकण्ठस्याष्टौ भृत्याः के ? ६. प्रसन्नः गुरुः किमवदत् ?

२) शत्रन्तैः शानजन्तैर्वा रूपैः वाक्यानि पूरयत—

१. ते बालाः (संभाष्)....हस्)...च पथि गच्छन्ति।
२. एते मृगा उन्नमितैककर्णा गानं (श्रु)...आसते।
३. स्त्रियः पतीनां वचनानि (कृ)...तान् प्रीणयन्ति।
४. पक्षिणो धान्यकणान् (ग्रह्)...स्वनीडं गच्छन्ति॥

३) तत्पुरुषसमासः—

| विग्रहवाक्यम् | | समासः |
|---|---|---|
| १. अह्नः मध्यम् | = | मध्याह्नः । |
| २. रात्रेः मध्यम् | = | मध्यरात्रः । |
| ३. कायस्य पूर्वम् | = | पूर्वकायः ॥ |

४) अव्ययीभावसमासः—

| | | |
|---|---|---|
| १. कालमनतिक्रम्य | = | यथाकालम् । |
| २. दिने दिने | = | प्रतिदिनम् । |
| ३. अहनि अहनि | = | प्रत्यहम् । |
| ४. नगरस्य समीपे | = | उपनगरम् ॥ |

५) नियुज्, श्रु, ब्रू—एषां तुमुन् प्रत्ययान्तैः वाक्यानि रचयत ॥

६) पर्यायाः—

धनिकः ४—इभ्य आढ्यो धनी स्वामी ।

भृत्यः ११—भृत्य दासेय दासेर दास गोप्यक चेटकाः ।
नियोज्य किङ्कर प्रैष्य भुजिष्य परिचारकाः ।

मङ्गलं ११—श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥

---

सौध *m. n.* a mansion
कुटीर *n* a hut
स्वकीय *a* one's own
विश्रान्तिवेला *f* interval
दुर्गत *a* miserable
उदीरित *ppp.* uttered
भृतिदान *n* payment of wages
श्रद्धातव्य *pt. p.* can be trusted
अविश्वसनीय *a.* untrustworthy
वेतन *n* wages
विनोदार्थम् *in.* in fun
हृदयङ्गम *a* attractive
चमत्कृत *a* astonished
श्रेयस् *n* prosperity.

# ७. काष्ठविक्रेता कुठारश्च

कस्मिंश्चिद्ग्रामे कुठारैकजीवनः कश्चित् काष्ठविक्रेताऽवर्तत। स प्रत्यहं कुठारच्छिन्नानि काष्ठानि विक्रीय तद्धनेन जीविकामकरोत्। एकदा काष्ठानि छिन्दतस्तस्य कुठारो हस्तात् स्रस्तः सहसा नद्यां पपात। स तत्रावतीर्य तं ग्रहीतुं नाशक्नोत्। अधिकूलं स्थितः उच्चैःकारं चक्रन्द॥



तस्य करुणं क्रन्दनं श्रुत्वा भगवान् वरुणस्तस्य पुरस्तादाविर्भूय तं शोककारणमपृच्छत्। स च यथावृत्तमात्मनः कुठारस्य वृत्तान्तं विज्ञापयामास॥

तदाकर्ण्य वरुणो जले निमज्य राजतमेकं कुठारमानीय तमप्राक्षीत्—'किमयं ते कुठारः?'—इति। स प्रत्यवोचत्—

'नायं मदीयः'—इति। ततो वरुणः पुनरपि निमज्ज्य सौवर्ण मेकं कुठारमानीय तस्मा अदर्शयत्। 'नायमपि मदीयः' इति तेनाभ्यधायि ॥

तच्छ्रुत्वा भगवान् भूयोऽपि जले निमग्नस्तदीयमायसं कुठारमाहृत्य तस्मै ददौ। तल्लाभेन परं प्रमोदमुपगतः स काष्ठविक्रेता कृतज्ञतामाविष्कुर्वन् वरुणं बहुधा तुष्टाव। वरुणोऽपि तस्य सत्यवचसा प्रीतः सौवर्णराजतावुभावपि कुठारौ तस्मै दत्त्वा तिरोदधे ॥

उदन्तमेनं तस्य प्रातिवेशिकः कश्चिदाकर्ण्य स्वयमपि हैमं कुठारं लब्धुमिच्छन् गृहादेकमायसं कुठारं गृहीत्वा तस्या एव नद्यास्तीरं जगाम। गत्वा च तत्र स्वीयं कुठारं नद्यां प्रक्षिप्योच्चैरुच्चुक्रोश ॥

तन्निशम्य तत्राविर्भूतो वरुणः तस्य शोकहेतुं विज्ञाय नद्यां पतितः सद्य एव हैमं कुठारमानीय—'अप्ययं भवदीयः कुठारः?' इत्यप्राक्षीत्। बलवता लोभेनाकृष्टः स पुरुषः—'आम्, अयमेव मदीयः, मदीय एवायम्' इति ब्रुवन् तस्य हस्तात् तं बलादाक्रष्टुमयतिष्ट ॥

भगवान् वरुणस्तं लोभाविष्टमनृतभाषिणं विनिन्दन् झटिति कुठारेण सह नद्यां निममज्ज। हैमं कुठारं लिप्समानस्य तस्य आयसः कुठारोऽपि नष्टः ॥

॥अतोऽत्याशया मिथ्या वदतो जनस्य स्थितोऽप्यर्थो विनश्यति॥

---

१) प्रश्नाः—१. कः किं निमित्तं नद्यास्तीरे स्थित उच्चैःकारं चक्रन्द? २. वरुणस्तस्य पुरस्तादाविर्भूय किमपृच्छत्? ३. अनन्तरं किमभूत्? ४. उदन्तमेनमाकर्ण्य प्रातिवेशिकः किं चकार? ५. स कीदृशं फलमलभत? ६. अस्मिन् पाठे उपदेशः कः?

२) कुठारच्छिन्नानि, यथावृत्तम्, तल्लाभेन, लोभाविष्टः, शोकहेतुः, एतेषां विग्रहवाक्यानि निर्दिशत ॥

३) अव्ययीभावसमासः—

| | | |
|---|---|---|
| १. कूले इति | = | अधिकूलम्। |
| २. काश्याम् इति | = | अधिकाशि। |
| ३. ग्रामस्य समीपे | = | उपग्रामम्। |

४) 'सन्' प्रत्ययान्ताः—

| | | |
|---|---|---|
| १. लब्धुमिच्छति | = | लिप्सते। |
| २. आप्तुमिच्छति | = | ईप्सति। |
| ३. दातुमिच्छति | = | दित्सति—ते ॥ |

५) कृत्प्रत्ययान्तः—

१. छिद् to cut = (छिनत्ति) छिन्नः, छिन्नवान्, छिन्दन्, छिद्यमानः, छित्वा, विच्छिद्य, छेत्तुम्, छेत्तव्यम्।
२. भिद् to break = (भिनत्ति) भिन्नः, भिन्नवान्, भिन्दन्, भिद्यमानः, भित्वा, विभिद्य, भेत्तुम्, भेत्तव्यम् ॥

६) पर्यायाः—

कुठारः ४—द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।
वरुणः ५—प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ॥

---

स्रस्त *ppp.* slipped
अधिकूलम् *in.* on the bank
उच्चैःकारम् *in.* with a loud noise
प्रातिवेशिक *m* a neighbour
आविर्भूत *ppp.* appeared
भवदीय *a* yours
लोभाविष्ट *a* avaricious.

---

## ८. अपरिचितसौहार्दे दोषः

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम् ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचिज्जम्बुकेनावलोकितः । तं दृष्ट्वा जम्बुकोऽचिन्तयत्—'आः ! कथमेतन्मांसं सुललितं भक्षयामि । भवतु, विश्वासं तावदुत्पादयामि'—इत्यालोच्योपगम्याब्रवीत्—'मित्र ! कुशलं ते ?' मृगेणोक्तम्—'कस्त्वम् ?' स ब्रूते—'क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यम् । मृगेणोक्तम्—'एवमस्तु' ॥

ततः पश्चादस्तं गते सवितरि तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत्—'सखे! चित्राङ्ग!



कोऽयं द्वितीयः?'। मृगो ब्रूते—'जम्बुकोऽयम्। अस्मत्सख्यमिच्छन्नागतः'। काको ब्रूते—'मित्र! अकस्मादागन्तुना सह मैत्री न युक्ता'॥

तच्छ्रुत्वा जम्बुकः सकोपमाह—'मृगस्य प्रथमदर्शनदिने भवानप्यागन्तुरेवाभूत्। तत् कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते। यथायं मृगो मम बन्धुस्तथा

भवानपि । मृगोऽब्रवीत्—'किमनेनोत्तरेण? सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयताम्'। काकेनोक्तम्—'एवमस्तु'॥

अथ प्रातः सर्वे यथाभिमतदेशं गताः। एकदा निभृतं शृगालो ब्रूते—'सखे! चित्राङ्ग! अस्मिन् वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति। तदहं त्वां नीत्वा दर्शयामि'। तथा कृते सति स मृगः प्रत्यहं तत्र गत्वा सस्यं खादति। अथ क्षेत्रपतिना तत् दृष्ट्वा पाशो नियोजितः। अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत्—'को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः'। तत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्—'फलितः तावदस्माकं कपटप्रबन्धेन मनोरथः। एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयाऽवश्यं प्राप्तव्यानि। तानि च बाहुल्येन भोजनानि भविष्यन्ति॥

मृगो जम्बुकमागतं दृष्ट्वोल्लसितो ब्रूते—'सखे! छिन्धि तावन्मम बन्धनम्। सत्वरं त्रायस्व माम्'। जम्बुको मुहुर्मुहुः पाशं विलोक्याचिन्तयत्—'दृढस्तावदयं बन्धः'। ब्रूते च—"सखे! स्नायुनिर्मिता एते पाशाः। तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि। मित्र! यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत् त्वया वक्तव्यं तन्मया कर्तव्यम्"—इत्युक्त्वा तत्समीपे क्वचिदात्मानमाच्छाद्य स्थितः॥

अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्येतस्ततोऽन्विष्य गतस्तथाविधं दृष्ट्वोवाच—'सखे! किमेतत्?

मृगेणोक्तम्—'सुहृद्वाक्यावधीरणस्य फलमेतत्'। काको ब्रूते—'स वञ्चकः क्वास्ते?' मृगेणोक्तम्—'मांसार्थी तिष्ठत्यत्रैवान्तर्हितः। काको ब्रूते—'उक्तमेव मया पूर्वम्'। ततः काको दीर्घं निश्वस्य निजगाद—'अरे! वञ्चक! किमिदं त्वया पापकर्मणा कृतम्! अथवा स्थितिरियं दुर्जनानाम्'॥

अथ प्रभाते क्षेत्रपतिः लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः। तमालोक्य काकेनोक्तम्–'सखे! मृग! त्वमात्मानं मृतवत् संदर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ। यदाऽहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे'। मृगस्तथैव काकवचनेन स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः। 'आः! स्वयं मृतोऽसि! इत्युक्त्वा मृगं बन्धान्मोचयित्वा पाशान् ग्रहीतुं सयत्नो बभूव। ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः। तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः। पश्यत! वञ्चकस्य आपतितं फलम्॥

उक्तं च सुभाषितरत्नाकरे—

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः।
अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते॥

---

१) प्रश्नाः—१. मृगकाकौ कुत्र न्यवसताम्? २. मृगः केनावलोकितः? ३. तं दृष्ट्वा जम्बुकः किमचिन्तयत्? ४. ततः

किमकरोत्? ५. किमुक्तं मृगेण? ६. मृगस्य चिरमित्रं काकः कुत्र निवसति? ७. तौ दृष्ट्वा काकः किमवदत्? ८. जम्बुकः कुपितः किमाह? ९. जम्बुकस्य क्षुद्रबुद्धिता काकस्य सुबुद्धिता च कथं व्यक्तीभवतः? १०. अनया कथया किं गृह्यते युष्माभिः?

२) मगधदेशः, स्वेच्छया, बन्धुहीन,ः सबन्धुः, सुहृद्वाक्यम्, अस्मत्सख्यम्—एषां विग्रहवाक्यानि निर्दिशत ॥

३) द्वन्द्वसमासः—

| | | |
|---|---|---|
| १. मृगश्च काकश्च | = | मृगकाकौ । |
| २. सीता च रामश्च | = | सीतारामौ । |
| ३. पुण्यानि च पापानि च | = | पुण्यपापानि ॥ |

४) तव्यप्रत्ययान्तैः रूपैः वाक्यानि पूरयत—

१. अधुना तवानुचरेण मया (भू)... ।

२. प्राज्ञैः सर्वदा सद्भिः सह सङ्गः (कृ)...॥

३. सर्वैरस्माभिः स्वविस्रम्भालापैः कालो (नी) ......॥

५) कृत्प्रत्ययान्ताः—

१. दृश् (णिच्) to show=(दर्शयति) दर्शितः, दर्शितवान्, दर्शयित्वा, संदर्श्य, दर्शयितुम्, दर्शनीयम्, दर्शयितव्यम् ।

२. पृ to fill=(पूरयति) पूर्णः, पूरितः, पूरितवान्, पूरयित्वा, सम्पूर्य, पूरयितुम्, पूरणीयम्, पूरयितव्यम्॥

६) पर्यायाः—

वनं ६—अटव्यरण्यं विपिनं गहनं काननं वनम् ।
इदानीं ५—एतर्हि सम्प्रतीदानीमधुना सांप्रतं तथा ॥

---

भक्ष्य *a* eatable
भक्षक *a* one who eats
सुललित *a* very nice, fine
क्षुद्रबुद्धि *a* low-minded
अनुचर *a. m.* a follower
चिरमित्र *n* an old friend
चित्राङ्ग *a. m.* striped
आगन्तु *N. m.* a stranger
विस्रम्भालाप *m* friendly conversation
निभृतम् *in.* privately
पाश *m* a net, snare
कपटप्रबन्ध *m* fraudulent scheme
उत्कृत्यमान *pr. pp.* torn [out
असृज् *n.* blood
उल्लसित *m. a.* delighted
स्नायुनिर्मित *a* made of muscle (शिरा)
भट्टारकवार *m* Sunday
वञ्चक *a* deceitful, a cheat *m* jackal
लगुडहस्त *a* with a club [in hand
वात *m* wind
स्तब्धीकृत्य *in* making motionless
पक्ष *m* शुक्ल or कृष्णपक्ष
अत्युत्कट *a* excessive.

---

## ९. महाकवि कालिदासस्य सूक्तयः

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥ १

लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागतः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ॥ २

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणं कुरुते ।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः ॥ ३

(मालविकाग्निमित्रनाटकात्)

यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ ४
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥

(विक्रमोर्वशीय नाटकात्)

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥

स्त्रीणामशिक्षितपटुत्वममानुषीषु
सन्दृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ ७

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥ ८
शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ ९

(अभिज्ञानशाकुन्तल नाटकात्)

---

१) प्रश्नाः—१. "सन्तः परीक्ष्यान्यतरद्भजन्ते" कयोरन्यतरत्?
२. "तं ज्ञानपण्यं वणिजं वदन्ति" कम्? ३. "प्रायः स्वं

महिमानं क्षोभात् प्रतिपद्यते हि जनः" किमत्रोदाहरणम्?
४. कीदृशं सुखं रसवत्तरं भवति? तत्र दृष्टान्तः कः?
५. सर्वेषां प्रार्थनीयं किम्? सर्वः किं किं करोतु?
६. "स्वभाव एवैष परोपकारिणाम्" कः? ७. स्त्रीणामशिक्षितपटुत्वे किञ्चिदुदाहरणं दर्शयत। ८. "अतः समीपे परिणेतुरिष्यते" का? कैः? ९. "यान्त्येवं गृहिणीपदं युवतयः" कथम्? १०. वामा कीदृश्यः?

२) नवमश्लोकगतानि वाक्यानि प्रयोगान्तरतया विपरिणमयत॥

३) लब्धास्पदः, विवादभीरुः, ज्ञानपण्यः, फलोद्गमैः, अनुद्धताः, सत्पुरुषाः—एषां विग्रहवाक्यानि निर्दिशत॥

४) सन्नन्ताः—

श्रोतुमिच्छति=शुश्रूषते। जेतुमिच्छति = जिगीषति।
ज्ञातुमिच्छति=जिज्ञासते। पातुमिच्छति =पिपासति।
द्रष्टुमिच्छति =दिदृक्षते। भवितुमिच्छति=बुभूषति॥

५) कृत्प्रत्ययान्ताः—

वद् to speak=(वदति) उदितः, उदितवान्, उदित्वा, अनूद्य, वदितुम्, वदनीयम्; वदितव्यम्॥

६) जुगुप्सते, तितिक्षते, मीमांसते, चिकित्सति, विचिकित्सति—एतैः वाक्यानि रचयत॥

७) पर्यायाः—

सर्वं १२—समग्रं सकलं सर्वं समस्तं निखिलाखिले।
समं कृत्स्नमशेषं च विश्वं पूर्णमनूनकम्॥

पतिव्रता ५—पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता॥

---

सूक्ति *f* a good speech
पुराण *a* old
नव *a* new
अवद्य *a* to be condemned
विप्रकृत *ppp*. hurt, offended
आगम *m* learning
ज्ञानपण्य *a* dealing in knowledge
द्विज *m* a bird ; also ब्राह्मण, दन्त
परभृत *m* कोकिल
सती *f* a chaste woman
प्रमदा *f* a young woman
सपत्नीजन *m* co-wives
प्रतीप *a* against
दक्षिणा *f* generous
वामा *a* acting contrary
आधि *m* mental agony

---

## १०. पत्रिकालेखनम्

पिता—सत्यमूर्ते! चिरादिव चिन्तयन् दृश्यसे। किं कर्तुमुद्यतोऽसि ?

सत्यमूर्तिः—तात! मद्रपुरस्थाय मम सहाध्यायिने सत्यकीर्तये पत्रिकां लिखामि।

पिता—चिरात् खलु चिन्तयसि। अपि समापितो लेखः?

सत्यमूर्तिः—तात। न समापितः।

पिता—आनय लेखम्, पश्यामि तावत्। (दृष्ट्वा) अरे! किमिदम्? नैकमप्यक्षरमत्र लिखितम्!

सत्यमूर्तिः—तात! पत्रिका कथं लेखनीयेति न ज्ञायते।

पिता—भद्र ! यदि सत्यकीर्तिस्तव सम्मुखेऽवर्तिष्यत तर्हि त्वं त्वदाशयं तस्मै विना क्लेशमवदिष्यः। किं न ?

सत्यमूर्तिः—आं तात ! भाषणं सुकरम्, लेखनं दुष्करम्।

पिता—अस्तु, को वा विषयः पत्रिकायां लेखनीयः ? अहं त्वां लेखनप्रकारं शिक्षयामि।

सत्यमूर्तिः—परीक्षायाः फलमधिकृत्य काऽपि पत्रिका प्रेषणीयेति तेनाहमुक्तः। 'तथा करिष्यामि' इति मया तस्मै प्रतिश्रुतम्। अयमेव विषयः पत्रिकायां लेखनीयः।

पिता—तेन सह साक्षात् सम्भाषणे यानि वाक्यान्यवदिष्यः तत्र तान्येव लिख।

सत्यमूर्तिः—केन प्रकारेण लेखस्योपक्रमः कर्तव्यः ?

पिता—समीचीनस्ते प्रश्नः। कथयामि तावत्। सर्वोऽपि लेखः स्वस्तिशब्देनारब्धव्यः। ततः पत्रिकालेखनस्थानं दिनं च विलिख्य अमुकनामकः अमुकनामानं प्रणिपत्य विज्ञापयतीति लेखनीयम्।

सत्यमूर्तिः—यदि कश्चिल्लेखः कनीयसे भ्रात्रे कनीयस्यै स्वस्रे वा प्रेष्यते कथं तत्र लेखनीयम् ? न हि तत्र प्रणिपातो युज्यते।

पिता—जात! साधु पृष्टम्। तत्र तावत् आयुष्मन्तं भ्रातरं अशीर्वचनपूर्वकं निवेदयतीति न्यसनीयम्। पुत्रादिभ्यः पत्रिकालेखनेऽप्ययमेव क्रमः। गुरुजनेभ्यः प्रेष्यमाणे लेखे तु विनयप्रकर्षं द्योतयितुं साष्टाङ्गपातं प्रणिपत्य सविनयं विज्ञापयतीति निवेशनीयम्।

सत्यमूर्तिः—(सद्य एव लेखं लिखित्वा) तात! लिखितो लेखः। निरूपयतु भवान्॥

## लेखः

॥ श्रीरामजयम्॥

कल्पात्ती—पालघाट्
श्रीमुख संवत्सरे चैत्रशुक्लपञ्चमी
१९३२ एप्रिल् २०.

आयुष्मन्! स्वस्ति!

प्रियसुहृदं सत्यकीर्तिशर्माणं सत्यमूर्तिः प्रणिपत्य विज्ञापयति। भोः! प्रियसुहृत्! सर्वे वयं कुशलिनः। शुश्रूषामहे च भवद्गतं कुशलम्॥

अस्माकं परिक्षायाः फलमद्य विद्यालये प्रकाशितं मया दृष्टम्। भवान् प्रथमत्वेनोत्तीर्णः। अहं तु द्वितीयत्वेन। भवतः संपर्केणैव मया द्वितीयं स्थानमधिगतम्। तेन भवते बहु धारयाम्यहम्। सम्प्रति भवतो विरहेण नितरां दूयते मे हृदयम्। अतोऽविलम्बिनेन प्रत्युत्तरेण मां प्रीणयितुमर्हति भवान्॥

अपरं च, भवतो व्यवसायं विनयमुत्साहं परोपकारितां सत्यशीलतां मितभाषितां सामयिकतां च बहुभिनन्दन्ति मे पितृपादाः। तत्तदवसरे मामुपदिशन्तस्ते भवन्तमेव निदर्शनतया दर्शयन्ति। यथापूर्वमागामिन्यपि वर्षेऽध्ययनार्थं भवतः धनसाहाय्यं ते करिष्यन्ति। अतः पुनरध्ययनारम्भकालेऽवश्यमेव भवता समागन्तव्यम्। वर्धतां नौ सौहार्दम् ॥

इति भवदीयं मित्रम्,
सत्यमूर्तिः ॥

श्रीयुत सत्यकीर्तिः,
नं ६४ संस्कृत कलाशाला वीथी
मैलापूर्, मद्रास्

---

१) प्रश्नाः—१. कथं लेखस्योपक्रमः कर्तव्यः? २. कनीयसे भ्रात्रे लिख्यमानायां पत्रिकायामादरणीयो विशेषः कः? ३. किञ्चन पत्रं मात्रे पित्रे भ्रात्रे स्वस्रे जामात्रे वा लिखत॥

२) एकपदीकुरुत—लब्धुमिच्छन्, स्वस्य इदम्, परस्य इदम्। अन्यस्य इदम्, महत् अरण्यम्, मृतेन तुल्यम्॥

३) सुखेन कर्तुं शक्यम्=सुकरम्। दुःखेन कर्तुं शक्यम्=दुष्करम्। एवं सुलभः, दुर्लभः इत्यादयः द्रष्टव्याः॥

४) १. सुहृदः भावः=सुहृत्ता, सुहृत्त्वम्, सौहार्दम्,
२. सुभगस्य भावः=सुभगता, सुभगत्वम्, सौभाग्यम्।
३. सुजनस्य भावः=सुजनता, सुजनत्वम्, सौजन्यम्॥

५) कृत्प्रत्ययान्ताः—

लिख् to write=(लिखति) लिखितः, लिखितवान्, लिखन्, लिख्यमानः, लिखित्वा-लेखित्वा, विलिख्य, लेखितुम्, लेखनीयम्, लेखितव्यम्।

पठ् to study=(पठति) पठितः, पठितवान्, पठन्, पठ्यमानः, पठित्वा, प्रपठ्य, पठितुम्, पठनीयम्, पठितव्यम्।

६) पर्यायाः—

लिपिः २—लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ।

प्रश्नः ३ }
उत्तरं २ } प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे॥

---

उद्यत *a* intent on
समापित *ppp*. completed
सम्मुख *n* front
प्रतिश्रुत *a* promised
विषय *m* subject matter
उपक्रम *m* beginning
समीचीन *a* right, good
अमुक *a* a person or thing, so and so. (To be used when a person or thing is referred to without a name.)
विनयप्रकर्ष *m* high modesty
विरह *m* separation
अविलम्बित *a* prompt
व्यवसाय *m* Industry
मितभाषिता *f* measured speech
सामयिकता *f* punctuality
निदर्शन *n* an example.

# ११. अयः

लोके तावत् सुवर्णं रजतं ताम्रं पित्तलं अयः सीसमित्येवंविधा बहवो लोहाः सन्ति। ते तत्तदाकरेषु मृदा लोहान्तरेण वा व्यामिश्रा उपलभ्यन्ते, न तु शुद्धरूपाः। तादृशास्ते खनिभ्यः उद्धृत्य संस्क्रियन्ते। संस्कृताश्च ते जनानामुपयोगाय कल्पन्ते। तेषां मध्येऽय एवात्यन्तमुपयुक्तो लोहः॥

अयस्तावद् भूम्यन्तर्भागे शिलाखण्डैः सह सम्मिश्रमासाद्यते। तानि च शिलाखण्डान्युत्खाय चूर्णपेषं पिष्ट्वा द्रवीकृत्य शुद्धमयः सम्पाद्यते। अत एवेदं 'अश्मसारः' इत्यभिधीयते। तच्च भूमण्डले सर्वत्र प्रभूततयाऽधिगम्यते। तस्मादस्य लोहस्य मूल्यमत्यल्पम्॥

अयसः प्रयोजनानीयत्तया निर्देष्टुमशक्यानि। यद्यपि सुवर्णादयो लोहा अप्यस्माकमुपयुक्ता एव तथापि तैर्विना वयं जीवितुं शक्नुयाम। अयसा विना त्वस्माकं लोकयात्रैव दुष्करा स्यात्। कृषिं कर्तुं गृहादिकं निर्मातुं च न प्रभवेम॥

अस्माकं खननोपयुक्तानि खनित्रपिटकादीनि, तक्षणोपयुक्तानि वृक्षादनादीनि, व्रश्चनोपयुक्तानि परशुकुठारादीनि, च्छेदनोपयुक्तानि छुरिकादीनि, कर्तनोपयुक्तानि कर्तर्यादीनि चायसा क्रियन्ते॥

अपि चाद्यत्वे नानाविधानि यन्त्राण्ययसा निर्मीयन्ते। अयसोऽभावे बाष्पशकटादीनां कथैव न स्यात्। साम्प्रतिको नागरिकपरिष्कारः सर्वोऽप्ययोमूलकः। आयसैरुपकरणैर्विना सुवर्णकारादयोऽपि स्वस्वकर्माणि कर्तुं न शक्नुवन्ति॥

योऽयसा तत्तदुपकरणानि करोति सोऽयस्कार इत्युच्यते। अयस्कारोऽस्माकमुपयुक्तानि भर्जनकपालानि विविधान्यन्यानि च पात्राणि करोति। इत्थमल्पमूल्योऽप्ययश्मसारो जनानाममूल्यो लोहः॥

---

१) प्रश्नाः—१. प्रधानभूता लोहाः के? २. अयसः उत्पत्तिः कथम्? ३. अयसः प्रयोजनानि कानि? ४. को नामायस्कारः? ५. स कानि वस्तूनि करोति?

२) लोहान्तरेण, अल्पमूल्यः, अमूल्यम्, अयोमूलकः—एषां विग्रहवाक्यानि निर्दिशत॥

३) अभूततद्भावार्थकाश्च्विप्रत्ययान्ताः—

१. अद्रवं द्रवं सम्पद्यमानं कृत्वा = द्रवीकृत्य।
२. अनन्धमन्धं सम्पद्यमानं करोति = अन्धीकरोति।
३. अखलः खलः सम्पद्यमानो भवति = खलीभवति।
४. अपटु पटुः सम्पद्यमानो भवति = पटूभवति॥

४) कृत्प्रत्ययान्ताः—

१. पिष् to grind=(पिनष्टि) पिष्टः, पिष्टवान्, पिंषन्, पिष्यमाणः, पिष्ट्वा, निष्पिष्य, पेष्टुम्, पेषणीयम्, पेष्टव्यम्॥

२. सह् to tolerate=(सहति, सहते) सोढः, सोढवान्, (सहन्, सहमानः), सह्यमानः, सोढ्वा, प्रसह्य ; सोढुम्, सोढव्यम्, सहनीयम्, सह्यम् ॥

५) पर्यायाः—

खनिः २—खनिः स्त्रियामाकरः स्यात् ।

अयः ५—अयोऽश्मसारो लोहोऽस्त्रीपिण्डं कालायसं तथा ।

बहु १२—प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥

---

अयस् *n* iron
सीस *n* lead
लोह *m* a metal
आकर *m* खनि *f* a mine
व्यामिश्र *a* mixed
इयत्ता *f* fixed measure
लोकयात्रा *f* the course of wordly life
खनित्र *n* a spade
तक्षण *n* paring, cutting
वृक्षादन *n* a carpenter's [chise]
व्रश्चन *n* cutting
परशु *m* an axe
छुरिका *f* a knife
कर्तन *n* lopping, cutting
कर्तरी *f* scissors
वाष्पशकट *m. n.* a steam carriage
साम्प्रतिक *a* modern
अयस्कार *m* an ironsmith
भर्जनकपाल *m* a fryingpan
सुवर्णकार *N. m* a goldsmith
अल्पमूल्य *a* of small value, cheap
अमूल्य *a* priceless, invaluable
अश्मसार *m. n.* iron.

---

# १२. मैत्री

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥ १

(पञ्चतन्त्रात्)

उद्यन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयन् समृद्धीनां फलं सुहृदनुग्रहम् ॥ २

(चन्द्रालोकात्)

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ ३

(चाणक्यनीतेः)

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ ४

(उत्तररामचरितात्)

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ ५

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनास्तदभवद्दृष्ट्वा स्वमित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्रीपुनस्त्वीदृशी ॥ ६

(नीतिशतकात्)

---

१) प्रश्नाः—१. के कैः सह सङ्गमनुव्रजन्ति? २. तेन किं ज्ञायते? ३. उदयन्नेव सविता किं करोति? ४. स किं विभावयंस्तथा करोति? ५. कीदृशं मित्रं वर्जयेत्? ६. पदार्थान् को व्यतिषजति? ७. प्रीतयः कान् न संश्रयन्ते? अत्र को दृष्टान्तः? ८. खलसज्जनानां मैत्री कीदृशी? ९. सतांमैत्री कीदृशी?

२) भावार्थकप्रत्ययान्ताः—

१. मित्रस्य भावः = मित्रता, मित्रत्वम्, मैत्री ।
२. सख्युः भावः = सखिता, सखित्वम्, सख्यम् ।
३. सुहृदः भावः = सुहृत्ता, सुहृत्वम्, सौहार्दम् ॥

३) सुधियः, कार्यहन्ता, विषकुम्भः, हिमरश्मिः, उन्मनाः, आरम्भगुर्वी—एषां विग्रहवाक्यानि लिखत ॥

४) द्वन्द्वसमासः—

१. खलाश्च सज्जनाश्च = खलसज्जनाः ।
२. सूर्यश्च चन्द्रश्च नक्षत्राणि च = सूर्यचन्द्रनक्षत्राणि ।
३. कुन्दं च इन्दुश्च तुषारश्च = कुन्देन्दुतुषाराः ।

५) अव्ययीभावसमासः—

१. अक्षि प्रति =प्रत्यक्षम् । ३. अक्ष्णः पश्चात्=अन्वक्षम् ।
२. अक्ष्णः परम्=परोक्षम् । ४. अक्षे इति =अध्यक्षम्

६) गुरुः, लघु, बहुः, मृदुः—एषां स्त्रीलिङ्गे रूपाणि निर्दिशत ॥

७) पर्यायाः—

सख्यम् २—सख्यं साप्तपदीनं स्यात् ।
सखा ३—स्निग्धो वयस्यः सवया अथ मित्रं सखा सुहृत् ॥

८) नानार्थाः—पतङ्गः=पक्षी, सूर्यः च ॥

---

मैत्री *N. f.* friendship
विभावयत् *pr. a. p.* considering
समृद्धि *f* prosperity
पयोमुख *a* having milk in the mouth
व्यतिषजति *P.* joins
आन्तर *a* internal
बहिरुपाधि *m* external attributes
पतङ्ग *m* the Sun, also a bird
द्रवति *P.* gets melted
हिमरश्मि *N. m* the cool-rayed, the Moon
चन्द्रकान्त *m* moon-stone
क्षयिणी *a* diminishing
पूर्वार्धपरार्धभिन्न *a. f.* divided by: the former and latter half of the day
कृशानु, पावक *m* fire
उन्मनस् *a* eager.

---